# শ্রীশিবমীডেস্তবরত্নম্

{॥ শ্রীশিবমীডেস্তবরত্নম্ ॥}

স্বপ্রকাশশিবরূপসদ্গুরুং নিষ্প্রকাশজডচৈত্যভাসকম্ ।

অপ্রমেযসুগুণামৃতালযং সংস্মরামি হৃদি নিত্যমদ্ভুতম্ ॥ ১॥

যঃ ক্রীডার্থং বিশ্বমশেষং নিজশক্ত্যা

সৃষ্ট্বা স্বস্মিন্ ক্রীডতি দেবোঽপ্যনবদ্যঃ ।

নিস্ত্রৈগুণ্যো মাযিকভূমিব্যতিরিক্তঃ

তং সর্বাঘধ্বংসকমাদ্যং শিবমীডে ॥ ২॥

একো দেবো ভাতি তরঙ্গেষ্বিব ভানুঃ

নানাভূতেষ্বাত্মসু সর্বেষ্বপি নিত্যম্ ।

শুদ্ধো বুদ্ধো নির্মলরূপো নিরবদ্যঃ

তং সর্বাঘধ্বংসকমাদ্যং শিবমীডে ॥ ৩॥

দেবাধীশং সর্ববরেণ্যং হৃদযাব্জে

নিত্যং ধ্যাত্বা যোগিবরা যং দৃঢভক্ত্যা ।

শুদ্ধা ভূত্বা যান্তি ভবাব্ধিং ন পুনস্তে

তং সর্বাঘধ্বংসকমাদ্যং শিবমীডে ॥ ৪॥

শ্রৌতৈঃ স্মার্তৈঃ কর্মশতৈশ্চাপি য ঈশো

দুর্বিজ্ঞেয়ঃ কল্পশতং তৈর্জডরূপৈঃ ।

সংবিদ্রূপস্বৈকবিচারাদধিগম্যঃ

তং সর্বাঘধ্বংসকমাদ্যং শিবমীডে ॥ ৫॥

কর্মাধ্যক্ষঃ কামিজনানাং ফলদাতা

কর্তৃত্বাহংকারবিমুক্তো নিরপেক্ষঃ ।

দেহাতীতো দৃশ্যবিবিক্তো জগদীশঃ

তং সর্বাঘধ্বংসকমাদ্যং শিবমীডে ॥ ৬॥

নান্তর্বাহ্যে নোভয়তো বা প্রবিভক্তং

যং সর্বজ্ঞং নাপি সমর্থো নিগমাদিঃ ।

তত্ত্বাতীতং তৎপদলক্ষ্যং গুরুগম্যং

তং সর্বাঘধ্বংসকমাদ্যং শিবমীডে ॥ ৭॥

যদ্ভাসার্কো ভাতি হিমাংশুর্দহনো বা

দৃশ্যৈর্ভাস্যৈর্যো ন চ ভাতি প্রিয়রূপঃ ।

যস্মাদ্ ভাতি ব্যষ্টিসমষ্ট্যাত্মকমেতত্

তং সর্বাঘধ্বংসকমাদ্যং শিবমীডে ॥ ৮॥

আশাদেশাদ্যব্যবধানো বিভুরেকঃ

সর্বাধারঃ সর্বনিয়ন্তা পরমাত্মা ।

পূর্ণানন্দঃ সত্ত্ববতাং যো হৃদি দেবঃ

তং সর্বাঘধ্বংসকমাদ্যং শিবমীডে ॥ ৯॥

কোঽহং দেবঃ কিং জগদেতত্ প্রবিচারাদ্
দৃশ্যং সর্বং নশ্বররূপং গুরুবাক্যাত্ ।
সিদ্ধে চৈবং যঃ খলু শেষঃ প্রতিপন্নঃ
তং সর্বাঘধ্বংসকমাদ্যং শিবমীডে ॥ ১০॥

সত্যং জ্ঞানং ব্রহ্ম সুখং যং প্রণবান্তং
সর্বস্ফূর্তিঃ শাশ্বতরূপস্ত্বিতি বেদ্ঃ ।
জল্পন্ত্যেবং স্বচ্ছধিযোঽপি প্রভুমেকং
তং সর্বাঘধ্বংসকমাদ্যং শিবমীডে ॥ ১১॥

যস্মাদ্ ভীতো বাতি চ বাযুস্ত্রিপুরেষু
ব্রহ্মেন্দ্রাদ্যাস্তে নিজকর্মস্বনুবদ্ধাঃ ।
চন্দ্রাদিত্যৌ লোকসমূহে প্রচরন্তৌ
তং সর্বাঘধ্বংসকমাদ্যং শিবমীডে ॥ ১২॥

মাযাকার্যং জন্ম চ নাশঃ পুরজেতুঃ
নাস্তি দ্বন্দ্বং নাম চ রূপং শ্রুতিবাক্যাত্ ।
নির্ণীতার্থো নিত্যবিমুক্তো নিরপাযঃ
তং সর্বাঘধ্বংসকমাদ্যং শিবমীডে ॥ ১৩॥

নাযং দেহো নেন্দ্রিযবর্গো ন চ বাযুঃ

নেদং দৃশ্যং জাত্যভিমানো ন চ বুদ্ধিঃ ।

ইত্থং শ্রুত্যা যো গুরুবাক্যাত্ প্রতিলব্ধঃ

তং সর্বাঘধ্বংসকমাদ্যং শিবমীডে ॥ ১৪॥

স্থূলং সূক্ষ্মং ক্ষামমনেকং ন চ দীর্ঘং

হ্রস্বং শুক্লং কৃষ্ণমখণ্ডোঽব্যযরূপঃ ।

প্রত্যক্সাক্ষী যঃ পরতেজাঃ প্রণবান্তঃ

তং সর্বাঘধ্বংসকমাদ্যং শিবমীডে ॥ ১৫॥

যৎসৌখ্যাব্ধের্লেশকণাংশোঃ সুরমর্ত্যা-

স্তির্যঞ্চোঽপি স্থাবরভেদাঃ প্রভবন্তি ।

তত্তৎকার্যপ্রাভববন্তঃ সুখিনস্তে

তং সর্বাঘধ্বংসকমাদ্যং শিবমীডে ॥ ১৬॥

যস্মিঞ্জ্ঞাতে জ্ঞাতমশেষং ভুবনং স্যাদ্

যস্মিন্ দৃষ্টে ভেদসমূহো লযমেতি ।

যস্মিন্মৃত্যুর্নাস্তি চ শোকো ভবপাশাঃ

তং সর্বাঘধ্বংসকমাদ্যং শিবমীডে ॥ ১৭॥

দ্যাং মূর্ধানং যস্য বদন্তি শ্রুতযস্তাঃ

চন্দ্রাদিত্যৌ নেত্রযুগং জ্যাং পদযুগ্মম্ ।

আশাং শ্রোত্রং লোমসমূহং তরুবল্লীঃ

তং সর্বাঘধ্বংসকমাদ্যং শিবমীডে ॥ ১৮॥

প্রাণাযামৈঃ পূতধিযো যং প্রণবান্তং

সংধাযাত্মন্যব্যপদেশ্যং নিজবোধম্ ।

জীবন্মুক্তাঃ সন্তি দিশাসু প্রচরন্তঃ

তং সর্বাঘধ্বংসকমাদ্যং শিবমীডে ॥ ১৯॥

যচ্ছ্রোতব্যং শ্রৌতগিরা শ্রীগুরুবাক্যাদ্

যন্মন্তব্যং স্বাত্মসুখার্থং পুরুষাণাম্ ।

যদ্ ধ্যাতব্যং সত্যমখণ্ডং নিরবদ্যং

তং সর্বাঘধ্বংসকমাদ্যং শিবমীডে ॥ ২০॥

যং জিজ্ঞাসুঃ সদ্গুরুমূর্তিং দ্বিজবর্যং

নিত্যানন্দং তং ফলপাণিঃ সমুপৈতি ।

ভক্তিশ্রদ্ধাদান্তিবিশিষ্টো ধৃতিযুক্তঃ

তং সর্বাঘধ্বংসকমাদ্যং শিবমীডে ॥ ২১॥

পৃথব্যম্ব্বগ্নিস্পর্শনখানি প্রবিলাপ্য

স্বস্মিন্ মত্যা ধারনযা বা প্রণবেন ।

যচ্ছিষ্টং তদ্ ব্রহ্ম ভবামীত্যনুভূতং

তং সর্বাঘধ্বংসকমাদ্যং শিবমীডে ॥ ২২॥

লীনে চিত্তে ভাতি চ একো নিখিলেষু

প্রত্যগ্দৃষ্ট্যা স্থাবরজন্তুষ্বপি নিত্যম্ ।

সত্যাসত্যে সত্যমভূচ্চ ব্যতিরেকাত্

তং সর্বাঘধ্বংসকমাদ্যং শিবমীডে ॥ ২৩॥

চেতঃসাক্ষী প্রত্যগভিন্নো বিভুরেকঃ

প্রজ্ঞানাত্মা বিশ্বভুগাদিব্যতিরিক্তঃ ।

সত্যজ্ঞানানন্দসুধাব্ধিঃ পরিপূর্ণঃ

তং সর্বাঘধ্বংসকমাদ্যং শিবমীডে ॥ ২৪॥

সর্বে কামা যস্য বিলীনা হৃদি সংস্থাঃ

তস্যোদেতি ব্রহ্মরবির্যো হৃদি তত্র ।

বিদ্যাবিদ্যা নাস্তি পরে চ শ্রুতিবাক্যাত্

তং সর্বাঘধ্বংসকমাদ্যং শিবমীডে ॥ ২৫॥

স ত্যাগেশঃ সর্বগুহান্তঃ পরিপূর্ণো

বক্তা শ্রোতা বেদপুরাণপ্রতিপাদ্যঃ ।

ইত্থং বুদ্ধৌ জ্ঞানমখণ্ডং স্ফুরদাস্তে

তং সর্বাঘধ্বংসকমাদ্যং শিবমীডে ॥ ২৬॥

নিত্যং ভক্ত্যা যঃ পঠতীদং স্তবরত্নং

তস্যাবিদ্যা জন্ম চ নাশো লযমেতু ।

কিং চাত্মনং পশ্যতু সত্যং নিজবোধং

সর্বান্ কামান্ স্বং লভতাং স প্রিয়রূপম্ ॥ ২৭॥

ইত্যানন্দনাথপাদপপদ্মোপজীবিনা কাশ্যপগোত্রোৎপন্নেনান্ধ্রেণ

ত্যাগরাজনাম্না বিরচিতং শিবমীডেস্তবরত্নং সংপূর্ণম্ ॥

Encoded by Sridhar Seshagiri seshagir at engineering.sdsu.edu

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Shivamide Stavaratnam Lyrics in Bengali PDF
% File name : shivamIDestava.itx
% Location : doc_shiva
% Author : tyAgarAja
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Sridhar Seshagiri seshagir at engineering.sdsu.edu
% Proofread by : Sridhar Seshagiri seshagir at engineering.sdsu.edu
% Latest update : June 20, 2002
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built

the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 12, 2015 ] at Stotram Website